# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ६** (New) | **गुणाः** – ७० |
| **विषयः** – नव्यव्याकरणम् | **कोड– CC - 1.1.2** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – २०/१२/२०१८ | **सन्दर्भग्रन्थः**– वैयाकरणसिद्धान्तकौमुदी (भ्वादिप्रकरणम्) | |

---

**प्र–१ कानि अपि पञ्च रूपाणि ससूत्रं साधनीयानि ।** **१०**

१. तेप्स्यते
२. तिप्सीष्ट
३. त्रेपे
४. जम्भते
५. जुगोप
६. चक्षण्वहे
७. आचामति

**प्र–२ कयोः अपि द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या ।** **१०**

१. आयादय आर्धधातुके वा ।
२. पुषादिद्युताद्य्लृदितः परस्मैपदेषु ।

**प्र–३ केषामपि पञ्चानां रूपाणां परिचयं लिखत ।** **१०**

**उदाहरणम् – ( प्रश्नः ) चख्नुतः**
**( उत्तरम् ) खन्–धतुः । लिट् लकारः । प्रथमपुरुषः, द्विवचनम् ।**

१. खायात्
२. गूहयति
३. अघुक्षत
४. अशिश्रियत्
५. भृषीष्ट
६. दधौ
७. धेयासुः

**प्र–४ कयोः अपि द्वयोः ग्रन्थपङ्क्त्योः सोदाहरणं व्याख्या कार्या ।** **१०**

१. एषां क्सस्य लुक् वा स्यात् दन्त्ये तङि । ढत्व–धत्व–ष्टुत्व–ढलोप–दीर्घाः । अगूढ ।
२. इणकुभ्यां परस्य एषां सस्य षः स्यात् ऊषतुः ।

**प्र–५ केषामपि पञ्चानां निर्देशानुसारं रूपाणि लेख्यानि ।** **१०**

**उदाहरणम् – ( प्रश्नः ) अद्–धातुः, लट्–लकारः, उत्तमपुरुषः, एकवचनम् ।**
**( उत्तरम् ) अद्मि**

१. अद्–धातुः, लिट्–लकारः, प्रथमपुरुषः, एकवचनम्
२. अद्–धातुः, लोट्–लकारः, मध्यमपुरुषः, एकवचनम्

३. हन्–धातुः, लट्–लकारः, प्रथमपुरुषः, बहुवचनम्

४. हन्–धातुः, लोट्–लकारः, मध्यमपुरुषः, एकवचनम्

५. हन्–धातुः, लुङ्–लकारः, प्रथमपुरुषः, एकवचनम्

६. दुह्–धातुः, लट्–लकारः, मध्यमपुरुषः, एकवचनम्

७. चक्ष्–धातुः, लट्–लकारः, प्रथमपुरुषः, एकवचनम्

**प्र–६ कयोः अपि द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या । १०**

१. ब्रुवः पञ्चानामादित आहो ब्रुवः ।

२. विदो लटो वा ।

३. तनादिकृञ्भ्य उः ।

**प्र–७ केषामपि दशानां प्रश्नानाम् एकैकवाक्यैः उत्तराणि लिखत । १०**

१. दीधीते इत्यत्र कः धातुः ?

२. शा हौ इति सूत्रेण हौ परे शासः कः आदेशः उच्यते ?

३. रुदितः इत्यत्र इडागमः केन सूत्रेण भवति ?

४. वत्स्यति इत्यत्र वस्–धातोः सकारस्य स्थाने तकारः केन सूत्रेण भवति ?

५. वोढा इत्यत्र वह्–धातोः अकारस्य स्थाने ओकारः केन सूत्रेण भवति ?

६. ग्रहिज्यावयि..... इति सूत्रं पूर्णं कुरुत ।

७. शासिवसिघसीनां च इति सूत्रं सकारस्य स्थाने कं वर्णम् आदेशं करोति ?

८. द्रक्ष्यति इत्यत्र अमागमः केन सूत्रेण भवति ?

९. गमिष्यति इत्यत्र इडागमः केन सूत्रेण भवति ?

१०. अदित इत्यत्र इत्–आदेशः केन सूत्रेण भवति ?

११. श्रु–श्रवणे इति धातुः कस्मिन् गणे वर्तते ?

१२. भ्रियात् इत्यत्र रिङ्–आदेशः केन सूत्रेण भवति ?

१३. *जग्मतुः इत्यत्र उपधालोपः केन सूत्रेण भवति ?*

१४. *पाघ्राध्मा..... इति सूत्रं पूर्णं कुरुत ।*

१५. *अपप्तत् इत्यत्र पुम्–आगमः केन सूत्रेण भवति ?*